कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ सप्तम काण्डे प्रथमः प्रश्नः॥

हरिः ओम्॥ प्रजननं ज्योतिरग्निर्देवतानां ज्योतिर्विराट्छन्दसां ज्योतिर्विराड्वाचोऽग्नौ सं तिष्ठते विराजमभि सं पद्यते तस्मात्तज्ज्योतिरुच्यते द्वौ स्तोमौ प्रातःसवनं वहतो यथा प्राणश्चाऽपानश्च द्वौ माध्यन्दिनग्ं सवनं यथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं यथा वाक्च प्रतिष्ठा च पुरुषसम्मितो वा एष यड्ज्ञोऽस्थूरि- [१] र्यङ्गामङ्गामयते तमेतेनाऽभ्यश्नुते सर्वग्ग् ह्यस्थूरिणाऽभ्यश्नुतेऽग्निष्टोमेन वै प्रजापतिः प्रजा असृजत ता अग्निष्टोमेनैव पर्यगृह्णात्तासां परिगृहीतानामश्वतरोऽत्यप्रवत तस्याऽनुहाय रेत आऽदत्त तद्गर्दभे न्यमार्ट्तस्माद्गर्दभो द्विरेता अथो आहुर्वडबायान्न्यमार्डितितस्माद्वडबा द्विरेता अथो आहुरोषधीषु [२] न्यमार्डिति तस्मादोषधयोऽनभ्यक्ता रेभन्त्यथो आहुः प्रजासु न्यमार्डिति तस्माद्यमौ जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि तस्माद्बर्हिष्यनवक्लुप्तः सर्ववेदसे वा सहस्रे वाऽवक्लुप्तोऽति ह्यप्रवत य एवं विद्वानग्निष्टोमेन यजते प्राऽजाताः प्रजा जनयति परि प्रजाता गृह्णाति तस्मादाहुर्ज्येष्ठयड्ज्ञ इति [३] प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाऽग्रेऽयजत प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथंतरग्ं साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्या मुखतो ह्यसृज्यन्तोरसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवताऽन्वसृज्यत त्रिष्टुप्छन्दो

बृह- [४] थ्साम राजन्यो मनुष्याणामविः पशूनां तस्मात्ते वीर्यावन्तो वीर्याद्ध्यसृज्यन्त मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपग्ं साम वैश्यो मनुष्याणां गावः पशूनां तस्मात्त आद्या अन्नधानाद्ध्यसृज्यन्त तस्माद्भूयाग्ंसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त पत्त एकविग्ंशं निरमिमीत तमनुष्टुप्छन्दो- [५] ऽन्वसृज्यत वैराजग्ं साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात्तौ भूतसङ्क्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो यङ्ञेऽनवक्लुप्तो न हि देवता अन्वसृज्यत तस्मात्पादावुप जीवतः पत्तो ह्यसृज्येतां प्राणा वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्रय इमे लोका असावादित्य एकविग्ंश एतस्मिन्वा एते श्रिता एतस्मिन्प्रतिष्ठिता य एवंवेदैतस्मिन्नेव श्रयत एतस्मिन्प्रतितिष्ठति॥[६]

अस्थूरिरेषधीषु ज्येष्ठयज्ञ इति बृहदनुष्टुप्छन्दः प्रतिष्ठिता नव च॥7.1.1॥

प्रातःसवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति सप्तदशेन प्राजापत्येन प्रजननेनैकविग्ंशाय ज्योतिर्दधदेति स्तोम एव तथ्स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्र णयति यावन्तो वै स्तोमास्तावन्तः कामास्तावन्तो लोकास्तावन्ति ज्योतीग्ष्येतावत एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीग्ष्यव रुन्धे॥[७]

तावन्तो लोकास्त्रयोदश च॥7.1.2॥

ब्रह्मवादिनो वदन्ति स त्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति यस्य त्रिवृतमन्तर्यन्ति प्राणाग्स्तस्याऽन्तर्यन्ति प्राणेषु मेऽप्यसदिति खलु वै यङ्ञेन यजमानो यजते यस्य पञ्चदशमऽन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽप्यसदिति खलु वै यङ्ञेन यजमानो यजते यस्य सप्तदशमन्तर्यन्ति [८] प्रजान्तस्याऽन्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यङ्ञेन यजमानो यजते यस्यैकविग्ंशमन्तर्यन्ति प्रतिष्ठान्तस्याऽन्तर्यन्ति प्रतिष्ठायां मेऽप्यसदिति खलु वै यङ्ञेन यजमानो यजते यस्य त्रिणवमन्तर्यन्त्यृतूग्श्च तस्य नक्षत्रियां च विराजमन्तर्यन्त्यृतुषु मेऽप्यसन्नक्षत्रियायाञ्च विराजीति [९] खलु वै यङ्ञेन यजमानो यजते यस्य त्रयस्त्रिग्ंशमन्तर्यन्ति देवतास्तस्याऽन्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यङ्ञेन यजमानो यजते यो वै स्तोमानामवमं परमताङ्गच्छन्तं वेद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत्परमो य एवं वेद परमतामेव गच्छति॥[१०]

*सप्तदशमन्तर्यन्ति विराजीति चतुश्चत्वारिग्ंशच्च॥**7.1.3**॥*

अङ्गिरसो वै सत्त्रमासत ते सुवर्गं लोकमायन्तेषाग्ं हविष्माग्श्च हविष्कृच्चाऽहीयेतां तावकामयेताग्ं सुवर्गं लोकमियावेति तावेतन्द्विरात्रमपश्यतान्तमाऽहरतान्तेनाऽयजेतान्ततो वै तौऽसुवर्गं लोकमैतां य एवं विद्वान्द्विरात्रेण यजते सुवर्गमेव लोकमेति तावैतां पूर्वेणाह्नागच्छतामुत्तरेणा– [११] ऽभिप्लवः पूर्वमहर्भवति गतिरुत्तरं ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाऽव रुन्धे सर्वस्तोमोऽतिरात्र उत्तरग्ं सर्वस्याऽऽप्त्यै सर्वस्याऽवरुद्ध्यै गायत्रं पूर्वेऽहन्थ्साम भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमात्मन्धत्ते त्रैष्टुभमुत्तर

ओजो वै वीर्यं त्रिष्टुगोज एव वीर्यमात्मन्धत्ते रथन्तरं पूर्वे– [१२] ऽहन्थ्साम भवतीयं वै रथन्तरमस्यामेव प्रति तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रति तिष्ठति तदाहुः क्व जगती चाऽनुष्टुप्चेति वैखानसं पूर्वेऽहन्थ्साम भवति तेन जगत्यै नैति षोडश्युत्तरे तेनाऽनुष्टुभोऽथाऽऽहुर्यथ्समानेऽर्धमासे स्यातामन्यतरस्याऽह्नो वीर्यमनु पद्येतेत्यमावास्यायां पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरन्नानैवाऽर्धमासयोर्भवतो नानावीर्ये भवतो हविष्मन्निधनं पूर्वमहर्भवति हविष्कृन्निधनमुत्तरं प्रतिष्ठित्यै॥[१३]

उत्तरिण रथन्तरं पूर्वेऽन्वेकविग्ंशतिश्च‖**7.1.4**‖

आपो वा इदमग्रे सलिलमासीत्तस्मिन्प्रजापतिर्वायुर्भूत्वाऽचरथ्स इमामपश्यत्तां वराहो भूत्वाऽहरत्तां विश्वकर्मा भूत्वा व्यमार्ट्साऽप्रथत सा पृथिव्यभवत्तत्पृथिव्यै पृथिवित्वं तस्यामश्राम्यत्प्रजापतिः स देवानसृजतवसून्रुद्रानादित्यान्ते देवाः प्रजापतिमब्रुवन्प्र जायामहा इति सोऽब्रवी– [१४] द्यथाऽहं युष्माग्स्तपसाऽसृक्ष्येवं तपसि प्रजननमिच्छध्वमिति तेभ्योऽग्निमायतनं प्राऽयच्छदेतेनाऽऽयतनेन श्राम्यतेति तेऽग्निनाऽऽयतनेनाऽश्राम्यन्ते संवथ्सर एकाङ्गमसृजन्त तां वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राऽयच्छन्नेताग्ं रक्षध्वमिति तां वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राऽजायत त्रीणि च [१५] शतानि त्रयस्त्रिग्ंशतञ्चाऽथ सैवस हस्रतम्यभवत्ते देवाः प्रजापतिमब्रुवन्थ्सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत्त इमँल्लोकमजयन्तच्चाऽददुः स उक्थ्येन रुद्रानयाजयन्तेऽन्तरिक्षमजयन्तच्चाददुः
सोऽतिरात्रेणाऽदित्यानयाजयत्तेऽमुँल्लोकमजयन्तच्चाऽददुस्तदन्तरिक्षं [१६] व्यवर्यत

तस्मादुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं वै मध्यममहस्त्रिरात्रस्य वि हि तदवैर्यतेति त्रैष्टुभं मध्यमस्याऽह्न आज्यम्भवति संयानानि सूक्तानि शग्ंसति षोडशिनग्ं शग्ंसत्यह्नो धृत्या अशिथिलम्भावाय तस्मात्त्रिरात्रस्याऽग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथाऽतिरात्र एषाँल्लोकानां विधृत्यै त्रीणित्रीणि शतान्यनूचीनाहमव्यवच्छिन्नानि ददा- [१७] त्येषां लोकानामनु संतत्यै दशतं न वि च्छिन्द्याद्विराजन्नेद्विच्छिनदानीत्यथ या सहस्रतम्यासीत्तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताग्ं स इन्द्रोऽमन्यताऽनया वा इदं विष्णुः सहस्रं वक्ष्यत इति तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत उभा जिग्यथुरिति तां वा एतामच्छावाक [१८] एव शग्ंसत्यथ या सहस्रतमी सा होत्रे देयेति होतारं वा अभ्यतिरिच्यते यदतिरिच्यते होताऽनाप्तस्याऽऽपयिताऽथाऽहुरुन्नेत्रे देयेत्यतिरिक्ता वा एषा सहस्रस्याऽतिरिक्त उन्नेतर्त्विजामथाऽऽहुः सर्वेभ्यः सदस्येभ्यो देयेत्यथाऽऽहुरुदाकृत्या सा वशाञ्चरेदित्यथाऽऽहुर्ब्रह्मणे चाऽग्नीधे च देयेति [१९] द्विभागं ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै ब्रह्मा वैष्णवोऽग्नीद्यथैव तावकल्पेतामित्यथाऽऽहुर्या कल्याणी बहुरूपा सा देयेत्यथाऽऽहुर्या द्विरूपोभयतएनी सा देयेति सहस्रस्य परिगृहीत्यै तद्वा एतथ्सहस्रस्याऽयनग्ं सहस्रग्ग् स्तोत्रीयाः सहस्रं दक्षिणाः सहस्रसंमितः सुवर्गो लोकः सुवर्गस्य लोकस्याऽभिजित्यै॥[२०]

अब्रवीच्च तदन्तरिक्षन्ददात्यच्छावाकश्च देयेति सप्तचत्वारिग्ंशच्च||7.1.5||

सोमो वै सहस्रमविन्दत्तमिन्द्रोऽन्वविन्दत्तौ यमो न्यागच्छत्तावब्रवीदस्तु मेऽत्राऽपीत्यस्तु ही ३ इत्यब्रूताग्ं स यम एकस्यां वीर्यं पर्यपश्यदियं वा अस्य

सहस्रस्य वीर्यं बिभर्तीति तावब्रवीदियं ममाऽस्त्वेतद्युवयोरिति तावब्रूताग्ं सर्वे वा एतदेतस्यां वीर्यं [११] परि पश्यामोऽग्ंशमा हरामहा इति तस्यामग्ंशमाऽहरन्त तामप्सु प्राऽवेशयन्थ्सोमायोदेहीति सा रोहिणी पिङ्गलैकहायनी रूपं कृत्वा त्रयस्त्रिग्ंशता च त्रिभिश्च शतैः सहोदैत्तस्माद्रोहिण्या पिङ्गलयैकहायन्या सोमङ्क्रीणीयाद्य एवं विद्वान्रोहिण्या पिङ्गलयैकहायन्या सोमङ्क्रीणाति त्रयस्त्रिग्ंशता चैवाऽस्य त्रिभिश्च [१२] शतैः सोमः क्रीतो भवति सुक्रीतेन यजते तामप्सु प्राऽवेशयन्निन्द्रायोदेहीति सा रोहिणी लक्ष्मणा पष्ठौही वार्त्रघ्नी रूपङ्कृत्वा त्रयस्त्रिग्ंशता च त्रिभिश्च शतैः सहोदैत्तस्माद्रोहिणीँल्लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं दद्याद्य एवं विद्वान्रोहिणीं लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं ददाति त्रयस्त्रिग्ंशच्चैवाऽस्य त्रीणि च शतानि सा दत्ता [१३] भवति तामप्सु प्रावेशयन् यमायोदेहीति सा जरती मूर्खा तज्जघन्या रूपङ्कृत्वा त्रयस्त्रिग्ंशता च त्रिभिश्च शतैः सहोदैत्तस्माज्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुर्वीत य एवं विद्वाञ्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुरुते त्रयस्त्रिग्ंशच्चैवाऽस्य त्रीणि च शतानि साऽमुष्मिँल्लोके भवति वागेव सहस्रतमी तस्मा– [१४] द्वरो देयः सा हि वरः सहस्रमस्य सा दत्ता भवति तस्माद्वरो न प्रतिगृह्यः सा हि वरः सहस्रमस्य प्रतिगृहीतं भवतीयं वर इति ब्रूयादथाऽन्यां ब्रूयादियं ममेति तथाऽस्य तथ्सहस्रमप्रतिगृहीतं भवत्युभयतएनी स्यात्तदाहुरन्यतएनी स्याथ्सहस्रं परस्तादेतमिति यैव वरः [१५] कल्याणी रूपसमृद्धा सा स्याथ्सा हि वरः समृद्ध्यै तामुत्तरेणाऽऽग्नीध्रं पर्याणीयाऽऽहवनीयस्याऽन्ते द्रोणकलशमव घ्रापय एदा जिघ्र कलशं मह्युरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मा सहस्र आ भज प्रजया पशुभिः सह पुनर्माऽऽ विशतादयिरिति प्रजयैवैनं पशुभी

रय्या स- [२६] मर्धयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तया सहाऽऽग्नीध्रं परेत्य पुरस्तात्प्रतीच्यां तिष्ठन्त्यां जुहुयादुभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः। इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति त्रेधाविभक्तं वै त्रिरात्रे सहस्रग्ं साहस्रीमेवैनाङ्करोति सहस्रस्यैवैनां मात्रां [२७] करोति रूपाणि जुहोति रूपैरेवैनाग्ं समर्धयति तस्या उपोत्थाय कर्णमा जपेदिडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अघ्निये नामानि सुकृतं मा देवेषु ब्रूतादिति देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुध्यन्ते॥[२८]

*एतदेतस्याँवीर्यमस्य त्रिभिश्च दत्ता सहस्रतमी तस्मादेव वरस्सं मात्रामेकान्न चत्वारिग्ंशच्च॥**7.1.6***॥

सहस्रतम्या वै यजमानः सुवर्गँल्लोकमेति सैनग्ं सुवर्गँल्लोकङ्गमयति सा मा सुवर्गँल्लोकङ्गमयेत्याह सुवर्गमेवैनं लोकं गमयति सा मा ज्योतिष्मन्तँल्लोकङ्गमयेत्याह ज्योतिष्मन्तमेवैनँल्लोकङ्गमयति सा मा सर्वान्पुण्याँल्लोकान्गमयेत्याह सर्वानेवैनं पुण्याँल्लोकान्गमयति सा [२९] मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्माऽऽ विशतादृयिरिति प्रजयैवैनं पशुभी रय्यां प्रतिष्ठापयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाऽध्वर्यवे वा दद्याथ्सहस्रमस्य सा दत्ता भवति सहस्रमस्य प्रतिगृहीतम्भवति यस्तामविद्वा- [३०] न्प्रतिगृह्णातितां प्रति गृह्णीयादेकाऽसि न सहस्रमेकां त्वा भूतां प्रति गृह्णामि न सहस्रमेका मा भूताऽऽ विश मा सहस्रमित्येकामेवैनां भूतां प्रति गृह्णाति न सहस्रं य एवं वेद स्योनाऽसि सुषदा सुशेवा स्योना माऽऽ विश सुषदा माऽऽ विश सुशेवा माऽऽ विशे- [३१] त्याह स्योनैवैनग्ं सुषदा सुशेवा भूताऽऽ

विशति नैनग्ं हिनस्ति ब्रह्मवादिनो वदन्ति सहस्रग्ं सहस्रतम्यन्वेती ३ सहस्रतमीग्ं सहस्रा ३ मिति यत्प्राचीमुथ्सृजेथ्सहस्रग्ं सहस्रतम्यन्वियात्तथ्सहस्रमप्रङ्ङात्रग्ं सुवर्गँल्लोकं न प्र जानीयात्प्रतीचीमुथ्सृजति ताग्ं सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गँल्लोकमेति यजमानमभ्युथ्सृजति क्षिप्रे सहस्रं प्र जायत उत्तमा नीयते प्रथमा देवान्गच्छति॥[३२]

लोकान्गमयति साऽविद्वान्थ्सुशेवा माऽऽ विश यजमानन्द्वादश च॥7.1.7॥

अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतञ्चतूरात्रमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै तस्य चत्वारो वीरा आऽजायन्त सुहोता सूद्गाता स्वध्वर्युः सुसभेयो य एवं विद्वाग्श्चतूरात्रेण यजत आऽस्य चत्वारो वीरा जायन्ते सुहोता सूद्गाता स्वध्वर्युः सुसभेयो ये चतुर्विग्ंशाः पवमाना ब्रह्मवर्चसन्त- [३३] द्य उद्यन्तः स्तोमाः श्रीः सात्रिग्ग् श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपाऽनमन्तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यग्ं स एताग्श्चतुरश्चतुष्टोमान्थ्सोमानपश्यत्तानाऽहरत्तैरयजत तेज एव प्रथमेनाऽवाऽरुन्धेन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनाऽन्नाद्यं चतुर्थेन य एवं विद्वाग्श्चतुरश्चतुष्टोमान्थ्सोमानाहरति तैर्यजते तेज एव प्रथमेना७व रुन्ध इन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनाऽन्नाद्यं चतुर्थेन यामेवाऽत्रिर्ऋद्धिमार्ध्नोत्तामेव यजमान ऋध्नोति॥[३४]

तत्तेज एवाऽष्टादश च॥7.1.8॥

जमदग्निः पुष्टिकामश्चतूरात्रेणाऽयजत स एतान्पोषाग्ं अपुष्यत्तस्मात्पलितौ जामदग्नियौ न सञ्जानाते एतानेव पोषान्पुष्यति य एवं विद्वाग्श्चतूरात्रेण यजते पुरोडाशिन्य उपसदो भवन्ति पशवो वै पुरोडाशः पशूनेवाऽव रुन्धेऽन्नं वै पुरोडाशोऽन्नमेवाऽव रुन्धेऽन्नादः पशुमान्भवति य एवं विद्वाग्श्चतूरात्रेण यजते॥[३५]

जमदग्निरष्टाचत्वारिग्ंशत्॥7.1.9॥

संवथ्सरो वा इदमेक आसीथ्सोऽकामयतर्तून्थ्सृजेयेति स एतं पञ्चरात्रमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै स ऋतूनसृजत य एवं विद्वान्पञ्चरात्रेण यजते प्रैव जायते त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन्तमाऽहरन्तेनाऽयजन्त ततो वै ते व्यावर्तन्त [३६] य एवं विद्वान्पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणाऽऽ वर्तते सार्वसेनिः शौचेयोऽकामयत पशुमान्थ्स्यामिति स एतं पञ्चरात्रमाऽहरत्तेनाऽयजत ततो वै स सहस्रं पशून्प्राऽऽप्नोद्य एवं विद्वान्पञ्चरात्रेण यजते प्र सहस्रं पशूनाप्नोति बबरः प्रावाहणिरकामयत वाचः प्रवदिता स्यामिति स एतं पञ्चरात्रमा– [३७] ऽहरत्तेनाऽयजत ततो वै स वाचः प्रवदिताऽभवद्य एवं विद्वान्पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं वाचस्पतिरित्याहुरनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष सं प्रति यड्ञो यत्पञ्चरात्रो य एवं विद्वान्पञ्चरात्रेण यजते सं प्रत्येव यड्ञेन यजते पञ्चरात्रो भवति पञ्च वा ऋतवः संवथ्सर [३८] ऋतुष्वेव संवथ्सरे प्रति तिष्ठत्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यड्ञो यड्ञमेवाऽव रुन्धे त्रिवृदग्निष्टोमो भवति तेज एवाऽव रुन्धे पञ्चदशो भवतीन्द्रियमेवाऽव रुन्धे सप्तदशो

भवत्यन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तेन जायते पञ्चविग्ं॑शोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्याऽवरुद्ध्यै विश्वजिथ्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याऽभिजित्यै॥[३९]

ते व्यावर्तन्त प्रवदिता स्यामिति स एतं पञ्चरात्रमा संवथ्सरोऽभिजित्यै॥7.1.10॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददइमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या। तया देवाः सुतमा बभूवुर्ऋतस्य सामन्थ्सरमारपन्ती॥ अभिधा असि भुवनमसि यन्ताऽसि धर्ताऽसि सोऽग्निं वैश्वानरग्ं॑ सप्रथसङ्गच्छ स्वाहाकृतः पृथिव्यां यन्ता राड्यन्ताऽसि यमनो धर्ताऽसि धरुणः कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः॥[४०]

धरुणः पञ्चविग्ं॑शतिश्च॥7.1.11॥

विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामाऽस्यादित्यानां पत्वाऽन्विह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्याग्ं॑ स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवेताभ्य इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला एतन्देवेभ्योऽश्वं मेधाय प्रोक्षितङ्गोपायत॥[४१]

रन्तिस्स्वाहा द्वाविग्ं॑शतिश्च॥7.1.12॥

आयनाय स्वाहा प्रायणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा पलायिताय स्वाहाऽऽपलायिताय स्वाहाऽऽवल्गते स्वाहा परावल्गते स्वाहाऽऽयते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा॥[४२]

आयनायोत्तरमापलायिताय षड्विग्ंशतिः॥7.1.13॥

अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहाऽपां मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा॥[४३]

अग्नये वायवेऽपां मोदायेन्द्राय त्रयोविग्ंशतिः॥7.1.14॥

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहाऽवान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवथ्सराय स्वाहा सर्वस्मै स्वाहा॥[४४]

पृथिव्यै सूर्याय नक्षत्रेभ्यः प्राच्यै सप्तचत्वारिग्ंशत्॥7.1.15॥

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहाऽपां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा

सर्वस्मै स्वाहा॥[४५]

अग्नये सवित्रे पूष्णेऽपां मोदाय वायवे त्रयोविग्ंशतिः॥7.1.16॥

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहाऽग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहाऽऽशितिम्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहाऽऽतपाय स्वाहारण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा॥[४६]

पृथिव्या अग्नयेऽन्हे रात्रियै चतुश्चत्वारिग्ंशत्॥7.1.17॥

भुवो देवानाङ्क्रमणापसर्तस्य पथ्याऽसि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छन्दसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन त्वा छन्दसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षयाम्यादित्येभिर्देवेभिर्देवतया जागतेन त्वा छन्दसा युनज्मि वर्षाभिर्त्वर्तुना हविषा दीक्षयामि विश्वेभिर्देवेभिर्देवतयाऽऽनुष्टुभेन त्वा छन्दसा युनज्मि शरदा त्वर्तुना हविषा दीक्षयाम्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा युनज्मि [४७] हेमन्तशिशिराभ्यां त्वर्तुना हविषा दीक्षयाम्याऽहन्दीक्षामरुहमृतस्य पत्नीङ्गायत्रेण छन्दसा ब्रह्मणा चर्तग्ं सत्येऽधाग्ं सत्यमृतेऽधाम्। महीमू षु सुत्रामाणमिह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा॥[४८]

आनुष्टुभेन त्वा छन्दसा युजज्म्येकान्न पञ्चाशच्च॥7.1.18॥

ईंकाराय स्वाहेंकृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते
स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा व्यानाय स्वाहा ऽपानाय स्वाहा
संदीयमानाय स्वाहा संदिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा
पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपरग्ग्स्यते स्वाहोपरताय स्वाहा निवेक्ष्यते
स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा निषथ्स्यते स्वाहा निषीदते स्वाहा
निषण्णाय स्वाहा [४९] ऽऽसिष्यते स्वाहाऽऽसीनाय स्वाहा ऽऽसिताय स्वाहा
निपथ्स्यते स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय
स्वाहा शयिताय स्वाहा सं मीलिष्यते स्वाहा सं मीलते स्वाहा सं मीलिताय स्वाहा
स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्तायस्वाहा प्रभोथ्स्यते स्वाहा प्रबुध्यमानाय
स्वाहा प्रबुद्धाय स्वाहाजागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा
शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा [५०]
वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा सग्ंहास्यते स्वाहा संजिहानाय
स्वाहोज्जिहानाय स्वाहा विवथ्स्र्यते स्वाहा विवर्तमानाय स्वाहा विवृत्ताय
स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय
स्वाहा विधूताय स्वाहोत्क्रग्ग्स्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा
चङ्क्रमिष्यते स्वाहा चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते
स्वाहा कण्डूयमानाय स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकषमाणाय
स्वाहा निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मेहति तस्मै
स्वाहा यच्छकृत्करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा

सर्वस्मै स्वाहा॥[५१]

निषण्णाय स्वाहा वीक्षिष्यते स्वाहा निकषमाणाय स्वाहा सप्तविग्ंशतिश्च॥7.1.19॥

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमयृतस्य पन्था असि देवानाञ्छायाऽमृतस्य नाम तथ्सत्यं यत्त्वं प्रजापतिरस्यधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यन्पशुन्न गोपा इर्यः परिज्मा॥[५२]

अग्नये वायवे सूर्यायाऽष्टाचत्वारिग्ंशत्॥7.1.20॥

प्रजननं प्रातस्सवने वै ब्रह्मवादिनस्स त्वा आङ्गिरस आपो वै सोमो वै सहस्रतम्याऽत्रिर्जमदग्निस्संवथ्सरो देवस्य विभूरायनायाऽग्नये पृथिव्या अग्नये पृथिव्यै भुव ईङ्खरायाऽग्नये वायवे सूर्याय विग्ंशतिः॥20॥

प्रजननमङ्गिरसस्सोमो वै प्रतिगृह्णाति विभूर्वीक्षमाणाय द्विपञ्चाशत्॥५२॥

प्रजननं परिज्मा॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति सप्तम काण्डे प्रथमः प्रश्नः॥